अभ्यासप्रश्नपत्रम्–2

# PRACTICE PAPER–2

2018-2019

Class- X Subject- Sanskrit

Time- 3 Hours Max. Marks.- 80

| Q. No | Description | M.M |
|---|---|---|
| | सामान्य–निर्देशाः–<br>● कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 16 प्रश्नाः सन्ति।<br>● अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति । अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।<br>● प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।<br>● उत्तरलेखनात् पूर्वं प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।<br>● सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।<br>● प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।<br>**प्रश्नपत्रस्वरूपम् -**<br>अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।<br>खण्ड– 'क' अपठित–अवबोधनम् 10 अङ्काः<br>खण्ड– 'ख' रचनात्मक–कार्यम् 15 अङ्काः<br>खण्ड– 'ग' अनुप्रयुक्त–व्याकरणम् 25 अङ्काः<br>खण्ड– 'घ' पठित–अवबोधनम् 30 अङ्काः | |
| 1. | खण्ड– 'क'<br>अपठित–अवबोधनम् (10 अङ्काः)<br>**अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत-**<br>पुष्पाणि अतीव मनोहराणि भवन्ति। अस्माकं राष्ट्रिय-पुष्पं कमलं तु सर्वेषु पुष्पेषु अनुपमम् अस्ति। अस्य उत्पत्तिः सरोवरस्य पङ्कात् भवति। अतः अस्य नाम पङ्कजम् अपि प्रसिद्धम् वर्तते। इदम् सर्वेषाम् मनांसि आह्लादयति सर्वेभ्यः च रोचते। कमलं निजसौन्दर्येण सुगन्धिना च वैशिष्ट्यं प्राप्नोति। अस्य उपरि भ्रमराः गुञ्जन्ति। कमलस्य पत्रे स्थिताः जलबिन्दवः मुक्ताः इव शोभन्ते। सरोवरे विकसितानि कमलानि शोभनीयानि दर्शनीयानि च | |

| | | |
|---|---|---|
| | भवन्ति। वर्षाकाले यदा सरोवरस्य जलस्तरं वर्धते तदा कमलानि अपि उपरि आगच्छन्ति। पङ्के उत्पन्नं कमलं पङ्कात् कदापि न लिप्तं भवति तथैव विद्यार्थी अपि कुत्सिते कार्ये कदापि निर्लिप्तः न भवेत्। सर्वदा कमलवत् स्वसमाजे दुष्टेभ्यः दूरे स्थित्वा विद्यार्जनम् करणीयम्। तथाभूतः विद्यार्थी कमलवत् विद्यासौरभम् विकिरति। | |
| | **I. एकपदेन उत्तरत- (केवलं प्रश्नचतुष्टयम्)**<br>i. कमलस्य उत्पत्तिः कस्मात् भवति ?<br>ii. कमलस्य पत्रे स्थिताः जलबिन्दवः कीदृशाः दृश्यन्ते ?<br>iii. के शोभनीयानि दर्शनीयानि च भवन्ति?<br>iv. पङ्के उत्पन्नं कमलं कस्मात् लिप्तं न भवति?<br>v. कमलं निजसौन्दर्येण सुगन्धिना च किं प्राप्नोति ? | 1/2 x4=2 |
| | **II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) –**<br>i. यदा जलस्तरं वर्धते तदा किं भवति ?<br>ii. कमलम् कथं वैशिष्ट्यं प्राप्नोति ?<br>iii. विद्यार्थी कस्मिन् कार्ये कदापि निर्लिप्तः न भवेत् ? | 1 x2=2 |
| | **III. यथानिर्देशम् उत्तरत (केवलं प्रश्नचतुष्टयम्)**<br>i. 'कमलम्' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम् ?<br>(क) वैशिष्ट्यम् (ख) अनुपमम् (ग) पुष्पम् (घ) पङ्कजम्<br>ii. ' विकसितानि कमलानि ' इत्यत्र विशेषणपदं किम् ?<br>(क) कमलानि (ख) विकसितानि (ग) द्वयम् (घ) किमपि न<br>iii. कमलस्य उत्पत्तिः कस्मात् भवति ?<br>(क) आकाशात् ( ख ) पंकात् (ग) मृत्तिकायाः (घ) समुद्रात्<br>iv. 'गुञ्जन्ति' इति क्रियापदस्य कर्ता कः ?<br>(क) छात्राः (ख) नराः (ग) भ्रमराः (घ) भ्रमराः<br>v. 'तडागः' इत्यस्य किं समानार्थकं पदं गद्यांशे प्रयुक्तम्? | 1 x4=4 |
| | IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। | 2 x1=2 |
| | | |

| | | |
|---|---|---|
| 2. | खण्ड– 'ख'<br>रचनात्मक–कार्यम् 15 अङ्काः<br>**विद्यालयस्य वार्षिकोत्सवम् अधिकृत्य मित्रं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयत-**<br><br>प्रिय मित्र<br>(i)............।<br>(ii).......... तव पत्रं प्राप्तम्। तव कुशलवृत्तान्तम् (iii)............... अतीव प्रसन्नः अभवम्। नूतनः समाचारः अस्ति यत् (iv)............. विद्यालयस्य वार्षिकोत्सवः आसीत्। सर्वे शिक्षकाः छात्राः च (v)............. व्यवस्थायै व्यस्ताः आसन्। अस्माभिः कार्यक्रमः (vi)............... आचरितः। दिल्लीप्रदेशस्य शिक्षानिदेशकः अस्य कार्यक्रमस्य (vii)................. आसीत्। सः विद्यालयस्य (viii).................. प्रशंसाम् अकरोत्। समारोहस्य अन्ते योग्येभ्यः (ix).............. पारितोषिकानां वितरणम् अभवत्। अधुना वार्षिकपरीक्षायाः कृते (x)................ कुर्वन् अस्मि। पितृभ्यः मम प्रणामान् निवेदयतु।<br>भवतः मित्रम्<br>रविवर्मा<br><br>कार्यक्रमस्य , ज्ञात्वा , गतसप्ताहे , नमस्कारः , ह्यः , हर्षोल्लासेन , मुख्यातिथिः , छात्रेभ्यः , अध्ययनं , वार्षिकोत्सवस्य | 1/2 x10=5 |
| 3. | अधः प्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लेखनीयानि– | 2 x5=10 |

| | | |
|---|---|---|
| | <br>पुष्पवाटिका , वृक्षाः, बालकाः, कन्दुकेन, जनाः, उपविशान्ति, झुला , क्रीडन्ति, बालिकाः, आसन्दे, भ्रमन्ति, पश्यन्ति, वार्तालापम् , पक्षी , कुर्वन्ति , अस्ति , सन्ति ,<br>**अथवा**<br>मंजूषायाः सहायतया निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –<br>विद्यालयस्य महत्त्वम्'<br>विद्यालयः, पुस्तकानि, छात्राः, शान्तिपूर्वकम् , पठन्ति, ज्ञानम् , विद्यालये , आसन्दः, उत्पीठिकाः, अस्ति, , कक्षाः , शिक्षिकाः , सन्ति, भवन्ति, शिक्षकाः, प्रधानाचार्यः, भवति, | |
| 4. | खण्ड– 'ग'<br>अनुप्रयुक्त–व्याकरणम् (25 अङ्काः)<br>अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत– (केवलं प्रश्नचतुष्टयम्)<br>(i) सह **नौ+अवतु** सह नौ भुनक्तु।<br>(ii) अहम् **कदापि** विद्यालयं गमिष्यामि। | 1 x4=4 |

| | | |
|---|---|---|
| | (iii)जनाः **<u>तरुच्छायायाम्</u>** उपविशन्ति।<br>(iv) निर्जने वने **<u>कः+अपि</u>** नासीत्।<br>(v) पश्य रमणीयमिदं **<u>भो+अनम् ।</u>** | |
| 5. | अधोलिखितवाक्येषु रेखांकितपदानां समासं समास–विग्रहं वा प्रदत्त–विकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्)<br>(i) **<u>नीलः कण्ठः यस्य सः</u>** हिमालये निवसति।<br>(अ) नीलकण्ठः (ब) नीलकण्ठी (स) नीलः कण्ठः<br>(ii) निर्धनेभ्यः **<u>यथाशक्तिः</u>** धनं ददातु।।<br>(अ) शक्ति–सहितम् (ब) शक्तेः योग्यम् (स) शक्तिम् अनतिक्रम्य<br>(iii) **<u>मोहनः च सोहनः च</u>** ग्रामं गच्छतः।<br>(अ) मोहनसोहनौ (ब) मोहनसोहनः (स) मोहनसोहनाः<br>(iv) **<u>पञ्चवटी</u>** उत्तरप्रदेशे अस्ति।<br>(अ) पञ्चनां वटानां समाहारः (ब) पञ्च–वटी (स) पञ्चमी वटी<br>(v) **<u>राजमार्गे</u>** जनाः अटन्ति।<br>(अ) राज्ञः मार्गे (ब) राजस्य मार्गे (स) राज्यस्य मार्गे | 1 x4=4 |
| 6. | अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति–प्रत्ययं संयोज्य विभज्य वा उचितं उत्तरं विकल्पेभ्यः चित्वा लिखत –(केवलं प्रश्नचतुष्टयम्)<br>(i) कदापि चौर्यम् न **<u>कृ+तव्यत्</u>** ।<br>(अ) कर्त्तव्यम् (ब) कार्यम् । (स) कृतम्<br>(ii) मार्गे **<u>गम्+शतृ</u>** सिंहान् पश्य ।<br>(अ) गच्छतान् (ब) गच्छतः (स) गच्छतानि<br>(iii) **<u>सेवमाना</u>** पुत्री सुखं लभते ।<br>(अ) सेव+टाप् (ब) सेव+शानच् (स) सेवम्+आना | 1 x4=4 |

| | | |
|---|---|---|
| | (iv) <u>**सांसारिकी**</u> उन्नतिः यशः वर्धयति।।<br><br>(अ) संसारिक+ङीप् (ख) संसारिक +ङीष् (स) संसारिक + ङीन्<br><br>(v) मेघं <u>**दृष्ट्वा**</u> मयूरी नृत्यति।<br><br>(अ) दृश्+क्त्वा (ख) दृष् + क्त्वा (स) दृष् + ट्वा | |
| 7. | शिक्षकः – किं त्वं पूजां करोषि ?<br><br>छात्रः – आम्! मया ..............(i)क्रियते।<br><br>शिक्षकः – किं रविः कवितां श्रृणोति ?<br><br>छात्रः – आम्! ............(ii) कविता श्रूयते।<br><br>शिक्षकः – राधया किं ..............(iii)?<br><br>छात्रः – राधा पुस्तकं पठति।<br><br>मंजुषा<br><br>पठ्यते , पूजा , रविणा<br><br>अथवा<br>अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत–<br>(क.) माता कार्यं करोति।<br>(ख.) बालकेन विद्यालयः गम्यते।<br>(ग.) युवकः हसति। | 1 x3=3 |
| 8. | **अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूर्यन्ताम् (केवलं प्रश्नचतुष्टयम्)-**<br>(i) अहं (5:00)..............उत्तिष्ठामि।<br><br>(ii) माता (7.15) ......... भोजनं पचति। | 1/2 x4=2 |

| | | |
|---|---|---|
| | (iii) सः (7:30)............विद्यालयं गच्छति।<br><br>(iv) पिता (8.45).......... कार्यालयं गच्छति।<br><br>(v) भ्राता सायं (4.00).......... क्रीडति। | |
| 9. | मंजूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत– (केवलं प्रश्नचतुष्टयम्)<br>(i) मूर्खाः ........... भ्रमन्ति।<br>(ii) ईश्वरः ............ विराजते।<br>(iii) असत्यं ..........वद ।<br>(iv) गजः ............... चलति।<br>(V) त्वं ..............कोलाहलं करोषि?<br>शनैः- शनैः , सर्वत्र , किमर्थम् , मा बहिः | 1 x4=4 |
| 10. | अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। अशुद्धं पदं संशोध्य पुनः लिखत–(केवलं प्रश्नचतुष्टयम्)<br>(i) सर्वे **<u>बालकः</u>** पठन्ति।<br><br>(ii) सोहनः **<u>प्रियं</u>** छात्रः अस्ति ।<br><br>(iii) किं त्वं **<u>श्वः</u>** आगतवान्।<br><br>(iv) मृगः **<u>एकः</u>** सिंहेन खादितम्।<br><br>(V) महिला ग्रामं **<u>गच्छन्ति</u>**। | 1 x4=4 |
| 11. | खण्ड– 'घ'<br>पठित–अवबोधनम् (30 अङ्काः)<br><br>अधोलिखितम् अंशं पठित्वा प्रदत्तप्रश्नानाम् उत्तरानि लिखत–<br>अस्ति कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्यनामधेयः कश्चित् कुमारः। बाल्ये वयसि | |

| | | |
|---|---|---|
| | विद्यापरांमुखः सः केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः। एकदा दुष्टबुद्धिना सार्धं कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः।<br><br>अथ व्रजन्तौ तौ गर्तसंकुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम् - भो भो बालकाः। कथमत्र नतोन्नते विषमे मार्गे क्रीडथ? यदि कश्चिद् गर्ते पतेत् तर्हि सः विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्। तत् श्रुत्वा तेषु कश्चित् उद्दण्डः बालकः उवाच - "अयि भोः! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ? अपि इदम् श्रेयस्करम्"?<br><br>I.एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)<br><br>(i) प्रच्छन्नभाग्यनामधेयः कस्मिन् नगरे आसीत्?<br><br>(ii) तौ कान् प्रेक्ष्य अवदताम्?<br><br>(iii) बालकाः कीदृशे मार्गे क्रीडन्ति स्म?<br><br>II. एकवाक्येन उत्तरत (केवलं प्रश्नमेकम्)<br><br>(i) उद्दण्डः बालकः किम् अवदत्?<br><br>(ii) प्रच्छन्नभाग्यनामधेयः दुष्टबुद्धिना सार्धं कुत्र प्रस्थितः?<br><br>III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत (केवलं प्रश्नचतुष्टयम्)<br><br>(क)'उवाच' इति क्रियापदस्य कर्तृपदं किम् ?<br><br>(i) तौ (ii) भवन्तौ (iii) बालकः (iii) क्लेशम्<br><br>(ख)'कुपथम्' - अस्य कः विलोमः गद्यांशे प्रयुक्तम् ?<br><br>(i) श्रेयस्करम् (ii) सुपथम् (iii) क्लेशम्<br><br>(ग) 'प्रेक्ष्य' इत्यत्र कः प्रत्ययः प्रयुक्तम्?<br><br>(i) ल्यप् (ii) प्र (iii) क्ष्यप्<br><br>(घ) उद्दण्डः बालकः - अत्र किं विशेषणपदम् अस्ति ?<br><br>(i) उद्दण्डः (ii) बालकः<br><br>(ङ) 'मार्गे' अत्र का विभ्क्तिः?<br><br>(i) तृतीया (ii) सप्तमी (iii) अष्टमी | 1 x2=2<br><br>2 x1=2<br><br>1/2 x4=2 |
| 12. | अधोलिखितम् पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तरानि लिखत– | |

| | | |
|---|---|---|
| | कोऽन्धः? योऽकार्यरतः, को बधिरः? यो हितानि न शृणोति ।<br>को मूकः? यः काले प्रियाणि वक्तुं न जानाति॥<br>I . एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)<br>(i) यः अकार्यरतः सः कः?<br>(ii) यः हितानि न शृणोति सः कः?<br>(iii) ' यो हितानि न शृणोति' अस्मिन् वाक्ये कर्मपदं किम् ?<br>II. एकवाक्येन उत्तरत (केवलं प्रश्नमेकम्) - 2x1=2<br>(i) यः काले प्रियाणि वक्तुं न जानाति सः कः भवति?<br>(ii) मूकः कः अस्ति ?<br>III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत (केवलं प्रश्नचतुष्टयम्) -<br>(क) 'वाचालः' - अस्य कः विलोमः श्लोके प्रयुक्तः?<br>(i) अन्धः (ii) मूकः (ii) बधिरः<br>(ख) अकार्यरतः' इति समस्तपदस्य विग्रह-पदं लिखत -<br>(i) कार्येण रहितम् (ii) कार्येण सहितम् (ii) न कार्यरतः<br>(ग) 'शृणोति' अस्मिन् पदे का धातुः?<br>(i) श्रु (ii) श्रू (iii) श्रवण<br>(घ) 'वक्तुम्' - अत्र कः प्रत्ययः ?<br>(i) तुमुन् (ii) कत्वा (iii) ल्यप्<br>(ङ) 'वाचालः' अस्य विपरीतार्थकं पदम् किम् ?<br>(i) मूकः (ii) वधिरः (iii) अन्धः | 1 x2=2<br><br>2 x1=2<br><br>1/2 x4=2 |
| 13. | अधोलिखितम् नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तरानि लिखत– | |

| | | |
|---|---|---|
| | भीमः– (युधिष्ठिरं प्रति) भ्रातः। द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं<br>ददातु भवान् ।<br>युधिष्ठिरः– गच्छ वत्स! विजयी भव, नकुलः तव सारथिः भवतु।<br>(भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति)<br>श्रीकृष्णः– भो धर्मराज! समीचीनं न कृतं भवता। पुत्रशोकविह्वलः<br>भीमसेनः एकाकी एवं द्रौणिं हन्तुम् अभिधावति।<br>युधिष्ठिरः– भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।<br>श्रीकृष्णः– वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः<br>द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे।<br>यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।<br>युधिष्ठिरः– अप्येवम्! आचार्येण कीदृशः अनर्थः कृतः। किं<br>चपलबालकेभ्यः एतादृश–भीषणानाम् अस्त्राणां प्रदानम्<br>उचितम्?<br>I. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)<br>i. कः एकाकी एवं द्रौणिं हन्तुम् अभिधावति?<br>ii. अर्जुनेन सह कः प्रविशति ?<br>iii. पुत्रशोकविह्वलः कः?<br>II. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)<br>i. केभ्यः केषां अस्त्राणां प्रदानम् न उचितम्?<br>ii. कस्मात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते?<br>III. यथानिर्देशम् उत्तरत– (केवलं प्रश्नचतुष्टयम्)<br>i. 'अस्त्राणाम्' इति पदस्य विशेषणं पदं नाट्यांशे किम् अस्ति?<br>(क.) भीषणानाम् (ख.) अस्त्राणाम् (ग.) प्रदानम्<br>ii. 'ददातु ' इति क्रियायाः कर्तृपदं किम्?<br>(क.) द्रौणिम् (ख.) अनुमतिम् (ग.) भवान्<br>iii. 'धर्मराज ' इति सम्बोधनं कस्मै प्रयुक्तम्?<br>(क.) युधिष्ठिराय (ख.) कृष्णाय (ग.) भीमाय<br>iv. 'आदानम्' अस्य पदस्य विलोमपदं नाट्याशे किं प्रयुक्तम्?<br>(क.) उचितम् (ख.) अलम् (ग.) प्रदानम्<br>v. 'प्रविशति' अस्मिन् क्रियापदे कः लकारः?<br>(क.) लृट् (ख.) लोट् (ग.) लट् | <br><br><br><br><br><br><br><br><br><br><br><br><br>1 x2=2<br><br><br><br>2 x1=2<br><br><br>1/2 x4=2 |
| 14. | रेखांकितपदानि आधृत्य प्रश्ननिर्माणं क्रियताम्– (केवलं प्रश्नचतुष्टयम्)<br>i. **<u>काकः</u>** सर्वत्र सुलभः वर्तते। | 1 x4=4 |

| | | |
|---|---|---|
| | ii. **पूर्वम्** इदं ब्रह्मकुण्डम् आसीत्।<br>iii. एतत् कुण्डं तु **लोहितनद्याः** किंचित् दूरे अस्ति।<br>iv. द्रौपद्याः पुत्राः **द्रोणपुत्रेण** हताः।<br>v. त्वमेव **पाण्डवान्** रक्षितवान्। | |
| 15. | मंजूषातः समुचितपदानि चित्वा अधोलिखित–पद्ययोः अन्वयं पूरयत–<br><br>(क.) त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।<br>परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।<br>अन्वयः– यः धर्मप्रदां (i) ................. त्यक्त्वा (ii).................(वाचं) अभ्युदीरयेत्। (सः) (iii)......... फलं परित्यज्य (iv).............. (फलं) भुङ्क्ते।<br><br>(ख.) वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।<br>स केनापि प्रकारेण परैर्न परिभूयते ।।<br>अन्वयः– मन्त्री (v) ................. धैर्यवान् (vi)................. अपि अकातरः (अस्ति) सः (vii)................ केनापि च प्रकारेण (viii).................... न परिभूयते।<br>मंजूषा<br>वाचं, सभायाम्, अपक्वं, वाक्पटुः परुषां, विमूढधीः, परैः, पक्वं, | 1/2 x8=4 |
| 16. | अधोलिखितानां कथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत–<br>(केवलं प्रश्नचतुष्टयम्)<br>i. **सम्प्रति** आश्वस्तः अस्मि।<br>(क.) पुरा (ख.) इदानीम् (ग.) कदा<br>ii. सकला **मही** कम्पते।<br>(क.) गृहम् (ख.) पृथ्वी (ग.) दिव्या<br>iii. **सम्यक्** अभिज्ञातम्।<br>(क.) समानरूपेण (ख.) वस्तुतः (ग.) सुष्ठुरूपेण<br><br>iv. **अरुणस्य** प्रदेशः अरुणाचलः।<br>(क.) चन्द्रस्य (ख.) सूर्यस्य (ग.) तारकस्य<br>v. अन्येषां **वदने** ये तु ...।<br>(क.) मुखे (ख.) शरीरे (ग.) वाद्ययन्त्रे | 1 x4=4 |